Shodhshauryam, International Scientific Refereed Research Journal
Available online at : www.shisrrj.com
OPEN ACCESS
© 2024 SHISRRJ | Volume 7 | Issue 2
ISSN : 2581-6306
doi : https://doi.org/10.32628/SHISRRJ

# श्रीवैखानस भगवच्छास्त्रोक्त अङ्कुरार्पणम्

Dr. T. Brahmacharyulu
Assistant Professor, Department of Vaikhanasa Agama, Sri Venkateswara Vedic University, Tirupati

**Article Info**

**Article History**
Received : 03 May 2024
Published : 15 May 2024
**Publication Issue :**
May-June-2024
Volume 7, Issue 3
**Page Number :** 25-28

**शोधसारांश:-** इत्थं प्रतिपादित अङ्कुरार्पण पुरस्सरं कर्मण: आरंभ: भवति चेत् तत्कर्म सफतामेष्यति इति महर्षय: सप्रमाणं प्रतिपादयामासु:। अनेन अङ्कुरार्पणेन यजमानस्य भक्तानाञ्च तुष्टि:,पुष्टि:, धनसम्पदश्च अभिवृद्धिं गमिष्यन्ति। अनावृष्ट्यादि वैपरीत्यानि निर्गत्य देशोयं सुभिक्षो भवतीति भगवता विखनसा प्रतिपाद्यते। वैखानसागमे तच्छिष्य: प्रणीतेषु अधिकारग्रन्थेषु अयं विषय: सप्रमाणं समुल्लिखित: तदर्थं एतत्कर्म सर्वारम्भककर्मत्वेन मनसि निधाय अस्याचरणं कृत्वा भगवत्कृपां आवहन्त्विति कामयमान: लेखनात् उपरमामि । **"वैखानसार्यदिव्याज्ञावर्धातामभिवर्धताम्"**

**कुञ्जिका-** अङ्कुरार्पणविधानं, महत्वं, प्रकाराणि, आवश्यकता, वैशिष्ट्यम्, शैववैष्णवाचारयुक्त:, यजमानस्य भक्तानाञ्च तुष्टि:,पुष्टि:, धनसम्पदश्च अभिवृद्धिम्।

**प्रस्तावना-**

**श्रिय:कान्ताय कल्याण निधयेनिधयेर्थिनां ।**
**श्रीवेङ्कटनिवासाय श्रीनिवासाय मङ्गलम्।।**

**'जन्तूनां नरजन्म दुर्लभम्'**[1] इत्युक्तरीत्यानुरोधेन मानवानां जन्म पुराकृतजन्मविशेषात् लभ्यते । तादृक् मानवा: पुनरावृत्तिरहितं शाश्वतं स्थानं प्राप्तुं भगवत: शरणागति: कर्तव्य:। तादृशं भगवत्तत्वं प्राप्तुं तत्त्वज्ञानमपेक्षते। तत्वज्ञानार्थं मानवास्सर्वेपि आन्तं यतन्ते इति नित्यप्रच: विषय:। तदर्थं सर्वानुग्रहाय भगवान् स्वयं अर्चावतारस्यैव स्वकीयं रूप: अप्राकृतात् प्राकृते आविष्करोति। तादृगर्चावतार परब्रह्मण: अधिकरणत्वेन विराजन्ते आलया:। एतेषां परस्परं आश्रय-आश्रयीभाव संबन्ध: विद्यते । एते आगमा: शैव, वैष्णव,शाक्त, गाणापत्य, कौमार, सौर भेदेन षट् दृश्यन्ते, चेदपि आभारते विशिष्य दक्षिणभारते शैववैष्णवभेदेन दरीदृश्यन्ते । एतेष्वागमेषु चरित, क्रिया, ज्ञान, योगविषया: प्रधानस्थानं आवहन्ति। एतेष्वल्पभेदा: अनेके वर्तन्ते । तेषु भेदेषु आलयनिर्माणं, विग्रहनिर्माणं, विग्रहप्रतिष्ठा, अर्चनं, स्नपनं, उत्सवं, प्रायश्चित्ताद्यंशा: परमात्मतत्वज्ञानाय सहकारीभूता: भवन्ति। अत्रोक्तेषु भगवत: कार्यक्रमेषु यस्य कस्यापि कार्यक्रमस्य आरम्भ: अङ्कुरार्पण्येव भवति । तादृगङ्कुरार्पणविषय: वैखानसागमोक्तरीत्या अत्र विवृणत्। अङ्कुरार्पणं नाम समन्त्रकं मेदिनीपूजां विधाय आनीतां मृत्तिकां अङ्कुरैस्सह पालिका, कुंभ, शरावेषु प्रक्षिप्य, सोमकुंभमासाद्य य: कार्यं क्रीयते स अङ्कुरार्पणमिति निगद्यते। सचाङ्कुरार्पणक्रम: महर्षिभि: अस्मान् अनुगृहीतुं प्रयोग पुरस्सरं सप्रमाणं प्रदत्तम्।

**1.अङ्कुरारोपणम्-**भूपरीक्षाप्रतिष्ठोत्सवस्नपनप्रायश्चित्तादिकर्मसु पर्वदिने वा तृतीय-पञ्चम-सप्तम- नवमेष्वहस्सु वा रात्रौ अङ्कुरार्पणं कर्तव्यम् [2]।।

**Copyright © 2024 The Author(s):** This is an open-access article distributed under the terms of the Creative Commons Attribution **4.0 International License (CC BY-NC 4.0)**

**2.अङ्कुरारोपणद्वैविध्यम्-**एतदङ्कुरारोपणं क्षुद्र–भद्रभेदेन द्विविधमिति वासाधिकारे सुष्ठूक्तम्। पुनः क्षुद्रम् अष्टधा भद्रं पञ्चधा च भवन्ति। प्रतिष्ठोत्सवदेवीविवाहप्रयोगादिषु भद्रम्। विष्णुपञ्चकदिनाऽयनविषुवादिसन्दर्भेषु सकलशुभकार्येषु च क्षुद्रमिति निर्णीतम्[3]।

**3.अङ्कुरवेदिप्रमाणम्-**ब्राह्मणो यजमानश्चेत् एकादश, क्षत्रियश्चेत् नव, वैश्यश्चेत् सप्त, शूद्रश्चेत् पञ्च हस्तप्रमाणेनाङ्कुरवेदिं परिकल्पयेत्[4]। चतुर्द्वारयुतायां षोडशस्तम्बयुक्तायां यागशालायां वायव्ये अङ्कुरवेदिं कल्पयेदिति निबन्धनकाराणामभिप्राय:[5]। पारम्पर्ये केचन ऐशान्येऽपि परिकल्पयन्ति। पूर्वोक्तहस्तप्रमाणपरिकल्पितवेद्यां भद्राङ्कुरारोपणं चेत् प्रागग्रारुत्तराग्रैरष्टसूत्रैः एकोनपञ्चाशत्पदानि करणीयानि। क्षुद्रश्चेत् पञ्चविंशतिपदानि करणीयानि[6]।

**4.आराधनक्रमः**:-पदेषु मध्ये षडङ्गुलप्रमाणवेदित्रयोपेतब्रह्मवेद्यां ब्रह्माणं, परितः जयाद्यप्सरसाः तत्परितः इन्द्रादीन्, तत्तत्पीठेषु आवाह्याराधयेत् तत्परितः, शास्त्रोक्तवत् ईशानादिचतुर्विंशतिदेवान्, ततः तेषु जयन्त्यादित्यग्रहक्षतगन्धर्वसुग्रीवासुर मुख्यार्गलस्थानेषु क्रमेण शेषवक्रतुण्डगरुडचत्रपङ्कीशभूतशङ्खशान्तान् आवाह्य, सोमेऽङ्कुराधिपसोमञ्चावाह्यार्चयेत्। ततः ईशानादिक्रमेण पालिकाकुम्भशरावान् संस्थाप्य, क्रमेण मेदिनीं राकां सिनीवालीञ्चार्चयेत्[7]। ततः अङ्कुरावापनं मृदापूरणं जलसेचनादीनि कार्याणि कुर्यादिति संहितासु उक्तम्[8]।

तत्र क्रमस्तु एवं निर्णीतं निबन्धनकारैः[9]–

ब्रह्मेशादीन् समभ्यर्च्य पुष्पादीनि विशोध्य च।

पुनर्ब्रह्माणमभ्यर्च्य शेषादीन् तदनन्तरम्।।

जयाद्यप्सरसोऽभ्यर्च्य लोकपालानानन्तरम्।

सोमं कुम्भे तथावाह्य पालिकापूजनं ततः।। इति

**5.पालिकादीनां लक्षणम्-**सुवर्णरजतताम्रमृण्मयान्वा पालिकाकुम्भशरावान् ब्राह्मणो यजमानात् षोडश, क्षत्रियात् द्वादश, वैश्यादष्टौ, शूद्रात् चतुरः, सर्वेषां चतुरो वा गृह्णीयात्[10]।

**5.1.पालिका-**पालिकोत्सेधं मात्राङ्गुलेन चतुर्विंशत्यङ्गुलं समवृत्तं तदुत्सेधं षोडशं कृत्वैकांषं पादं त्र्यंशं नालं द्व्यंशं पालिका पादोदरविष्कम्भं दशाङ्गुलमर्धाङ्गुलभित्तिकं पद्माकारं नालस्योदरविष्कम्भं चतुरङ्गुलमर्धाङ्गुलभित्तिकं मुखस्योदरविष्कम्भं षोडशाङ्गुलमर्धाङ्गुलभित्तिकं नालान्तं क्रमात्संक्षिप्तमोष्ठतारमेकाङ्गुलमेवं पालिका[11]।

**5.2.कुम्भम्-**कुम्भस्योदरविष्कम्भं षोडशाङ्गुलमर्धाङ्गुलभित्तिकं मुखस्योदरविष्कम्भं पञ्चाङ्गुलमर्धाङ्गुलभित्तिकं कण्ठोत्तुङ्गमेकाङ्गुलमोष्ठवलयमेकाङ्गुलं कुम्भाकारं चतुर्दिक्षुभागविस्तृतं द्वारयुतमन्यत्सर्वं पालिकावत्कारयेत्।[12]

**5.3.शरावम्-**शरावाणाम् ओष्ठमेकाङ्गुलम् एतदेव विशेषात् अन्यत्सववं पालिकावत्कारयेत्।[13]

सद्य एव आसन्ने कर्मणि पालिकादीनामलाभे शरावादिपात्राणि सङ्गृह्य पालिकादिवत्स्मृत्वा कारयेत् इति मरीचिना विमानार्चनकल्पे प्रोक्तम्[14]। तदप्यलाभे उपयुक्तानि पात्राणि जलेन प्रक्षाल्य, पर्यग्निं कृत्वा कारयेदिति केचित्पक्षमपि प्रदर्शितं मरीचेन[15]।

**6.अङ्कुरारोपणफलम्-**एवं शास्त्रोक्तविधिमनतिक्रम्याङ्कुरारोपणं कृत्वा त्रिकालं द्विकालम् एककालं वा आकर्मान्तमर्चयेत्। अनेन भगवान् प्रीतो भवति। अङ्कुरारोपणानन्तरं यदि अङ्कुराणि श्यामरक्तवर्णानि अधोमुखानि वा भवेयुः, तदा तानि निष्कास्य (पुनराचरेत्) । यतः श्यामवर्णेन द्रव्यनाशः, रक्तवर्णेन कलहः, अधोमुखेन रोगानि, अप्ररूढे मृत्युञ्च भवन्ति। यदि पीतशुक्लवर्णानि ऊर्ध्वमुखानि च भवन्ति तदा आचार्ययजमानादीना शुभकरं भवति[16]।

एतदङ्कुरारोपणं रात्रावेव करणीयं, यतः–

न प्रीतये भगवत: कृतमहन्यङ्कुरार्पणम् इति खिले सुस्पष्टमुक्तम्।[17]

अत्रिणा समूर्तार्चनाधिकरणे च एवमुक्तम्-

तस्मात्कुर्यात्प्रयत्नेन रात्रावेवाङ्कुरार्पणम्।
गुणाधिक्यं यदि भवेल्लग्नादिष्वह्नि वाऽऽचरेत्।[18] इति

एतदहनि वा चरेदिति वाक्यं सद्योऽङ्कुरारोपणविषयकमिति। यत: तत्पूर्वश्लोके एव नैव प्रीणाति भगवानङ्कुरार्पणमतिचरेदिति उक्तत्वात्।

**7.उपसंहार:-** इत्थं प्रतिपादित अङ्कुरार्पण पुरस्सरं कर्मण: आरंभ: भवति चेत् तत्कर्म सफतामेष्यति इति महर्षय: सप्रमाणं प्रतिपादयामासु:। अनेन अङ्कुरार्पणेन यजमानस्य भक्तानाञ्च तुष्टि:,पुष्टि:, धनसम्पदश्च अभिवृद्धिं गमिष्यन्ति। अनावृष्ट्यादि वैपरीत्यानि निर्गत्य देशोयं सुभिक्षो भवतीति भगवता विखनसा प्रतिपाद्यते। वैखानसागमे तच्छिष्य: प्रणीतेषु अधिकारग्रन्थेषु अयं विषय: सप्रमाणं समुल्लिखित: तदर्थं एतत्कर्म सर्वारम्भककर्मत्वेन मनसि निधाय अस्याचरणं कृत्वा भगवत्कृपां आवहन्त्विति कामयमान: लेखनात् उपरमामि । **"वैखानसार्यदिव्याज्ञावर्धातामभिवर्धताम्"**

**पादटिप्पणी-**

1.विवेकचूडामणि श्लोक-1

2.विमा.पृ-168

3.अङ्कुरं द्विविधं प्रोक्तं भद्रं क्षुद्रं द्विधा भवेत्।
प्रतिष्ठा चोत्सवं चैव देव्योर्वैवाहिकक्रिया।
एवमादीनि भद्राख्यं ज्ञात्वा चैव विचक्षण:।
विष्णुपञ्चदिने वाऽ अयने विषुवे तथा।
अन्यच्छुभानि कार्याणि क्षुद्राख्यं च भवेत्सदा।। वासा.6.अ 16त:18श्लो

4. आलयाऽभिमुखे वापि ऐशान्ये चोत्तरेऽपि वा।
रुद्रहस्तं द्विजातीनां नृपाणां नवहस्तकम्।
वैश्यानां मुनिहस्तन्तु शूद्राणां पञ्चहस्तकम्।
षोडशस्तम्भसंयुक्तं चतुर्द्वारसमायुतम्।
मण्डपं वाऽथ कूटं वा प्रपां वा विधिना चरेत्। प्रकी.10,अ 2त: 4 श्लो

5.पवि.अ.पृ.39

6.क्रिया 20, अ 15,16श्लो

7.अङ्कुरार्पणपटम्-अनुबन्धे पुटे द्रष्टव्यम्

8.विमा.पृ-170 प्रकी 10 अ,वास-6 अ, क्रिया-1 त: 26 श्लो, खिला-16 अ, 16 त: 47 श्लो, यज्ञा-22अ, समृ -26अ, काश्य,ज्ञा-100 त: 102 पृ।

9.ब्र.उ.अ.पृ-18

10.विमा.पृ-169

11.विमा.पृ-168

12.तत्रैव

13.विमा.पृ-169

14.तत्रैव

15.तत्रैव

16. श्यामेषु द्रव्यनाश: स्याद्रक्तेषु कलहो भवेत्।

तिर्यग्गतेषु रोगः स्यादप्ररूढे मृतिर्भवेत्।
शुभं पीतेषु शुक्लेषु ऋजुमूर्ध्वं गतेषु च।
कर्तुः कारयितुश्चैव भवत्येव न संशयः।
एवमेतत्क्रमेणैव मङ्गलायाङ्कुरार्पणम्।। समू–26अ,32 तः 34 श्लो

17.खिला–16 अ,28 श्लो

18.समू–16 अ, 42 श्लो

**उपयुक्तग्रन्थसूची-**


1. **विमानार्चनाकल्पः**,सम्पादकः – अग्निहोत्रं. श्रीनिवासाचार्युलु, श्रीवेङ्कटेश्वरस्वामि देवस्थानम्, द्वारकातिरुमला, तेलगु, 2014
2. **खिलाधिकारः**- सम्पादकः – पार्थसारथि भट्टाचार्युलु, ति.ति.देवस्थानम्, तिरुपति,1997
3. **वासाधिकारः**-सम्पादकः –दीवि.वेङ्कटरामाचार्युलु, ति.ति.देवस्थानम्, तिरुपति,1997
4. **प्रकीर्णाधिकारः**-सम्पादकः – एम्.के.श्रीनिवासभट्टाचार्युलु, ति.ति.देवस्थानम्, तिरुपति,1997
5. **समूर्तार्चनाधिकारः**-सम्पादकः –पि.रघुनाथचक्रवर्ति भट्टाचार्युलु, ति.ति.देवस्थानम्, तिरुपति,2014
6. **क्रियाधिकारः**-सम्पादकः – पार्थसारथि भट्टाचार्युलु, ति.ति.देवस्थानम्, तिरुपति,1998
7. **ज्ञानकाण्डम्**-सम्पादकः – पार्थसारथि भट्टाचार्युलु, ति.ति.देवस्थानम्, तिरुपति,1997
8. **यज्ञाधिकारः**-सम्पादकः – पार्थसारथि भट्टाचार्युलु, ति.ति.देवस्थानम्, तिरुपति,1999